Shiva Mahimna Stotram

शिवमहिम्नःस्तोत्रम्

SHLOKA · श्लोक

1 महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥

Mahimnah param te paramavidusho yady asadrishi
Stutir Brahmadinam api tad avasannas tvayi girah.
Athavachyah sarvah sva mati parinamavadhi grinan
Mamapy esha stotre Hara nirapavadah parikarah.

2 अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्ववर्वाचीने पतति न मनः कस्य न वचः॥

Atitah panthanam tava cha mahima van manasayo-
Ratad vyavrittya Yam chakitam abhidhatte shrutir api.
Sa kasya stotavyah katividha gunah kasya vishayah
Pade tv arvachine patati na manah kasya na vachah.

3 मधुस्फीता वाचः परममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता॥

Madhu sphita vachah paramam amritam nirmitavata-
Stava brahman kim vag api suraguror vismaya padam.
Mama tv etam vanim guna kathana punyena bhavatah
Punamity arthesmin puramathana buddhir vyavasita.

4 तवैश्वर्यं यत् तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥

Tavaishvaryam yat taj jagad udaya raksha pralaya krit
Trayi vastu vyastam tisrishu guna bhinnasu tanushu.
Abhavyanam asmin varada ramaniyam aramanim
Vihantum vyakroshim vidadhata ihaike jadadhiyah.

5 किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः॥

Kim ihah kim kayah sa khalu kim upayas tribhuvanam
Kim adharo dhata srijati kim upadana iti cha.
Atarkyaishvarye tvayy anavasara duhstho hatadhiyah
Kutarkoyam kanshchin mukharayati mohaya jagatah.

6 अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे॥

Ajanmano lokah kim avayavavantopi jagata-
Madhishthataram kim bhava vidhir anadritya bhavati.
Anisho va kuryad bhuvana janane kah parikaro
Yato mandas tvam pratyamaravara sansherata ime.

7 त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥

Trayi sankhyam yogah pashupati matam vaishnavam iti
Prabhinne prasthane param idam adah pathyam iti cha.
Ruchinam vaichitryad riju kutila nana patha jusham
Nrinam eko gamyas tvam asi payasam arnava iva.

8 महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति च भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति॥

Mahokshah khatvangam parashur ajinam bhasma phaninah
Kapalam chetiyat tava varada tantropakaranam.
Suras tam tam riddhim dadhati cha bhavad bhru pranihitam
Na hi svatmaramam vishaya mriga trishna bhramayati.

9 ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता॥

Dhruvam kashchit sarvam sakalam aparas tv adhruvam idam
Paro dhrauvyadhrauvye jagati gadati vyasta vishaye.
Samastepy etasmin puramathana tair vismita iva
Stuvan jihremi tvam na khalu nanu dhrishta mukharata.

10 तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥

Tavaishvaryam yatnad yad upari Virinchir Harir adhah
Parichchhettum yatav analam anala skandha vapushah.
Tato bhakti shraddha bhara guru grinadbhyam Girisha yat
Svayam tasthe tabhyam tava kim anuvrittir na phalati.

11 अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद् बाहूनभृत रणकण्डूपरवशान्।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्॥

Ayatnad apadya tribhuvanam avaira vyatikaram
Dashasyo yad bahun abhrita rana kandu paravashan.
Shirah padma shreni rachita charanambhoruha baleh
Sthirayas tvad bhaktes tripurahara visphurjitam idam.

12 अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः॥

Amushya tvat seva samadhigata saram bhuja vanam
Balat Kailasepi tvad adhivasatau vikramayatah.
Alabhya patalepy alasa chalitangushtha shirasi
Pratishtha tvayy asid dhruvam upachito muhyati khalah.

13 यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥

Yad riddhim sutramno varada paramochchair api sati-
Madhash chakre Banah parijana vidheya tribhuvanah.
Na tach chitram tasmin varivasitari tvach charanayo-
Rna kasyapy unnatyai bhavati shirasas tvayy avanatih.

14 अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥

Akanda brahmanda kshaya chakita devasura kripa-
Vidheyasyasid yas trinayana visham sanhritavatah.
Sa kalmashah kanthe tava na kurute na shriyam aho
Vikaropi shlaghyo bhuvana bhaya bhanga vyasaninah.

15 असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥

Asiddhartha naiva kvachid api sadevasura nare
Nivartante nityam jagati jayino yasya vishikhah.
Sa pashyann Isha tvam itara sura sadharanam abhut
Smarah smartavyatma nahi vashishu pathyah paribhavah.

16 मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥

Mahi padaghatad vrajati sahasa sanshaya padam
Padam Vishnor bhramyad bhuja parigha rugna graha ganam.
Muhur dyaur dausthyam yaty anibhrita jata tadita tata
Jagad rakshayai tvam natasi nanu vamaiva vibhuta.

17 वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद् द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥

Viyad vyapi taragana gunita phenodgama ruchih
Pravaho varam yah prishata laghu drishtah shirasi te.
Jagad dvipakaram jaladhi valayam tena kritami-
Tyanenaivonneyam dhrita mahima divyam tava vapuh.

18 रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥

Rathah kshoni yanta shatadhritir agendro dhanur atho
Rathange chandrarkau ratha charana panih shara iti.
Didhakshos te koyam tripura trinam adambara vidhi-
Rvidheyaih kridantyo na khalu paratantrah prabhudhiyah.

19 हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्॥

Haris te sahasram kamala balim adhaya padayo-
Ryad ekone tasmin nijam udaharan netra kamalam.
Gato bhakty udrekah parinatim asau chakra vapusha
Trayanam rakshayai tripurahara jagarti jagatam.

20 क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः॥

Kratau supte jagrat tvam asi phala yoge kratumatam
Kva karma pradhvastam phalati purusharadhanam rite.
Atas tvam samprekshya kratushu phala dana pratibhuvam
Shrutau shraddham baddhva dridha parikarah karmasu janah.

21 क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः।
क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः॥

Kriya daksho Dakshah kratu patir adhishas tanubhrita-
Mrishinam artvijyam sharanada sadasyah sura ganah.
Kratu bhreshas tvattah kratu phala vidhana vyasanino
Dhruvam kartuh shraddha vidhuram abhicharaya hi makhah.

22 प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥

Prajanatham natha prasabham abhikam svam duhitaram
Gatam rohid bhutam riramayishum rishyasya vapusha.
Dhanushpaner yatam divam api sapatrakritam amum
Trasantam tedyapi tyajati na mrigavyadha rabhasah.

23 स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः॥

Sva lavanyashansa dhrita dhanusham ahnaya trinavat
Purah plushtam drishtva puramathana pushpayudham api.
Yadi strainam devi yama nirata dehardha ghatana-
Davaiti tvam addha bata varada mugdha yuvatayah.

24 श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि॥

Shmashaneshv akrida smarahara pishachah sahachara-
Shchita bhasmalepah srag api nri karoti parikarah.
Amangalyam shilam tava bhavatu namaivam akhilam
Tathapi smartrinam varada paramam mangalam asi.

25 मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान्॥

Manah pratyak chitte savidham avadhayatta marutah
Prahrishyad romanah pramada salilotsangita drishah.
Yad alokyahladam hrada iva nimajjyamritamaye
Dadhaty antas tattvam kim api yaminas tat kila bhavan.

26 त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥

Tvam arkas tvam somas tvam asi pavanas tvam hutavaha-
Stvam apas tvam vyoma tvam u dharanir atma tvam iti cha.
Parichchhinnam evam tvayi parinata bibhratu giram
Na vidmas tat tattvam vayam iha tu yat tvam na bhavasi.

27 त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्॥

Trayim tisro vrittis tribhuvanam atho trin api sura-
Nakaradyair varnais tribhir abhidadhat tirna vikriti.
Turiyam te dhama dhvanibhir avarundhanam anubhih
Samastam vyastam tvam sharanada grinaty om iti padam.

28 भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते॥

Bhavah Sharvo Rudrah Pashupatir athograh saha maham-
Statha Bhimeshanav iti yad abhidhanashtakam idam.
Amushmin pratyekam pravicharati deva shrutir api
Priyayasmai dhamne pravihita namasyosmi bhavate.

29 नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः॥

Namo nedishthaya priyadava davishthaya cha namo
Namah kshodishthaya smarahara mahishthaya cha namah.
Namo varshishthaya trinayana yavishthaya cha namo
Namah sarvasmai te tad idam iti sharvaya cha namah.

30 बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥

Bahula rajase vishvotpattau bhavaya namo namah
Prabala tamase tat sanhare haraya namo namah.
Jana sukha krite sattvodriktau mridaya namo namah
Pramahasi pade nistraigunye shivaya namo namah.

31 कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥

Krisha parinati chetah klesha vashyam kva chedam
Kva cha tava guna simollanghini shashvad riddhih.
Iti chakitam amandikritya mam bhaktir adhad
Varada charanayos te vakya pushpopaharam.

32 असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति॥

Asita giri samam syat kajjalam sindhu patre
Sura taru vara shakha lekhani patram urvi.
Likhati yadi grihitva Sharada sarva kalam
Tad api tava gunanam Isha param na yati.

33 असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार॥

Asura sura munindrair architasyendu maule-
Rgrathita guna mahimno nirgunasyeshvarasya.
Sakala gana varishthah Pushpadantabhidhano
Ruchiram alaghu vrittaih stotram etach chakara.

34 अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः।
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च॥

Ahar ahar anavadyam Dhurjateh stotram etat
Pathati parama bhaktya shuddha chittah puman yah.
Sa bhavati Shivaloke Rudra tulyas tathatra
Prachuratara dhanayuh putravan kirtimansh cha.

35 महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्॥

Maheshan naparo devo mahimno napara stutih.
Aghoran naparo mantro nasti tattvam guroh param.

36 दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः।
महिम्नः स्तवपाठस्य कलां नार्हन्ति षोडशीम्॥

Diksha danam tapas tirtham jnanam yagadikah kriyah.
Mahimnah stava pathasya kalam narhanti shodashim.

37 कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः॥

Kusumadashana nama sarva gandharva rajah
Shishu shashidhara mauler deva devasya dasah.
Sa khalu nija mahimno bhrashta evasya roshat
Stavanam idam akarshid divya divyam mahimnah.

38 सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम्॥

Sura vara muni pujyam svarga mokshaika hetum
Pathati yadi manushyah pranjalir nanya chetah.
Vrajati Shiva samipam kinnaraih stuyamanah
Stavanam idam amogham Pushpadanta pranitam.

39 आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम्।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम्॥

Asamaptam idam stotram punyam gandharva bhashitam.
Anaupamyam manohari Shivam ishvara varnanam.

40 इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः॥

Ity esha vanmayi puja Shrimach chhankara padayoh.
Arpita tena deveshah priyatam me Sadashivah.

41 तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर।
यादृशोऽसि महादेव तादृशाय नमो नमः॥

Tava tattvam na janami kidrishosi Maheshvara.
Yadrishosi Mahadeva tadrishaya namo namah.

42 एककालं द्विकालं वा त्रिकालं यः पठेन्नरः।
सर्वपापविनिर्मुक्तः शिवलोके महीयते॥

Eka kalam dvi kalam va tri kalam yah pathen narah.
Sarva papa vinirmuktah Shivaloke mahiyate.

43 श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः॥

Shri Pushpadanta mukha pankaja nirgatena
Stotrena kilbisha harena Hara priyena.
Kantha sthitena pathitena samahitena
Suprinito bhavati bhutapatir Maheshah.

Text checked against: Gita Press, Gorakhpur: Shri Pushpadanta-virachit Shiv Mahimna Stotra (code 563), with Hindi translation and verse rendering. Meanings, audio and all scripts at nityapaath.com/shiv-mahimna-stotra/